# ॥ उडुपि श्री कृष्ण सुप्रभातम् ॥

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज ।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गलं कुरु ॥॥
नारायणाखिल शरण्य रथाङ्ग पाणे ।
प्राणायमान विजयागणित प्रभाव ।
गीर्वाणवैरि कदलीवन वारणेन्द्र ।
मध्वेश कृष्ण भगवन् तव सुप्रभातं ॥ १॥
उत्तिष्ठ दीन पतितार्तजनानुकम्पिन् ।
उत्तिष्ठ विश्व रचना चतुरैक शिल्पिन् ।
उत्तिष्ठ वैष्णव मतोद्भव धामवासिन् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ २॥
उत्तिष्ठ पातय कृपामसृणान् कटाक्षान् ।
उत्तिष्ठ दर्शय सुमङ्गल विग्रहन्ते ।
उत्तिष्ठ पालय जनान् शरणं प्रपन्नान् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ३॥
उत्तिष्ठ यादव मुकुन्द हरे मुरारे ।
उत्तिष्ठ कौरवकुलान्तक विश्वबन्धो ।
उत्तिष्ठ योगिजन मानस राजहंस ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ४॥
उत्तिष्ठ पद्मनिलयाप्रिय पद्मनाभ ।
पद्मोद्भवस्य जनकाच्युत पद्मनेत्र ।
उत्तिष्ठ पद्मसख मण्डल मध्यवर्तिन् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ५॥
मध्वाख्यया रजतपीठपुरेवतीर्णः ।
त्वत्कार्य साधनपटुः पवमान देवः ।
मूर्तेश्चकार तव लोकगुरोः प्रतिष्ठां ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ६॥
सन्यास योगनिरताश्रवणादिभिस्त्वां ।
भक्तेर्गुणैर्नवभिरात्म निवेदनान्तैः ।
अष्टौयजन्ति यतिनो जगतामधीशं ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ७॥
या द्वारकापुरि पुरातव दिव्यमूर्तिः ।
संपूजिताष्ट महिषीभिरनन्य भक्त्या ।

अद्यार्चयन्ति यतयोष्टमठाधिपास्तां ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥८॥
वामेकरे मथनदण्डमसव्य हस्ते ।
गृह्णंश्च पाशमुपदेष्टु मना इवासि ।
गोपालनं सुखकरं कुरुतेति लोकान् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥९॥
सम्मोहिताखिल चराचररूप विश्व ।
श्रोत्राभिराममुरली मधुराखेण ।
आधायवादयकरेण पुनश्चवेणुं ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥१०॥
गीतोष्णरश्मिरुदयन्वहनोदयाद्रौ ।
यस्याहरत्सकललोकहृदान्धकारं ।
सत्वं स्थितो रजतपीठपुरे विभासी ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥११॥
कृष्णेति मङ्गलपदं कृकवाकुवृन्दं ।
वक्तुं प्रयत्य विफलं बहुशः कुकूकुः ।
त्वां संप्रबोधयितुमुच्चरतीतिमन्ये ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥१२॥
भृङ्गापिपासव इमे मधु पद्मषन्दे ।
कृष्णार्पणं सुमरसो स्वितिहर्षभाजः ।
झङ्कार राव मिषतः कथयन्ति मन्ये ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥१३॥
निर्यान्ति शावक वियोगयुता विहङ्गाः ।
प्रीत्यार्भकेशु च पुनः प्रविशन्ति नीडं ।
धावन्ति सस्य कणिकानुपचेतु मारात् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥१४॥
भूत्वातिथिः सुमनसामनिलः सुगन्धं ।
सङ्गृह्यवाति जनयन् प्रमदं जनानां ।
विश्वात्मनोर्चनधियातव मुञ्च निद्रां ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥१५॥
तारालि मौक्तिक विभूषण मण्डिताङ्गी ।
प्राचीदुकूल मरुणं रुचिरं दधान ।
खेसौखसुप्तिक वधूरिव दृश्यतेद्य ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥१६॥
आलोक्य देह सुषमां तव तारकालिः ।
ह्रीणाक्रमेण समुपेत्य विवर्णभावं ।

अन्तर्हितेवनचिरात्यज शेषशय्यां ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥१७॥
साध्वीकराब्जवलयध्वनिनासमेतो ।
गानध्वनिः सुदधि मन्थन घोष पुष्टः ।
संश्रूयते प्रतिग्रहं रजनी विनष्टा ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥१८॥
भास्वानुदेश्यति हिमांशुर भूद्गतश्रीः ।
पूर्वान्दिशामरुणयन् समुपैत्यनूरुः ।
आशाः प्रसाद सुभगाश्च गतत्रियामा ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥१९॥
आदित्य चन्द्र धरणी सुत रौहिणेय ।
जीवोशनः शनिविधुं तुदकेतवस्ते ।
दासानुदास परिचारक भृत्य भृत्य ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥२०॥
इन्द्राग्नि दण्डधर निर्रिति पाशिवायु ।
वित्तेश भूत पतयो हरितामधीशाः ।
आराधयन्ति पदवी च्युति शङ्कया त्वाम् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥२१॥
वीणां सती कमलजस्य करे दधाना ।
तन्त्र्यागलस्य चरवे कलयन्त्य भेदं ।
विश्वं निमज्जयति गानसुधारसाब्धौ ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥२२॥
देवर्षिरंबर तलादवनीं प्रपन्नः ।
त्वत्सन्निधौ मधुरवादित चारु वीणा ।
नामानिगायति नत स्फुरितोत्तमाङ्गो ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥२३॥
वातात्मजः प्रणत कल्प तरुर्हनूमान् ।
द्वारे कृताञ्जलि पुटस्तवदर्शनार्थी ।
तिष्ठत्यमुं कुरुकृतार्थमपेत निद्रं ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥२४॥
सर्वोत्तमो हरिरिति श्रुतिवाक्य वृन्दैः ।
चन्द्रेश्वर द्विरदवक्त्र षडाननाद्याः ।
उद्घोशयन्त्य निमिषा रजनी प्रभात ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥२५॥
मध्वाभिदे सरसि पुण्यजले प्रभाते ।
गङ्गेंभ सर्वमघमाशु हरेति जप्त्वा ।

मज्जन्ति वैदिक शिखामणयो यथावन् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ २६॥
द्वारे मिलन्ति निगमान्त विदस्त्रयीज्ञाः ।
मीमांसकाः पदविदोनयदर्शनज्ञाः ।
गान्धर्ववेद कुशलाश्च तवेक्षणार्थं ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ २७॥
श्री मध्वयोगि वरवन्दित पादपद्म ।
भैष्मी मुखांभोरुह भास्कर विश्ववन्द्य ।
दासाग्रगण्य कनकादिनुत प्रभाव ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ २८॥
पर्याय पीठ मधिरुह्य मठाधिपास्त्वां ।
अष्टौ भजन्ति विधिवत् सततं यतीन्द्राः ।
श्री वादिराजनियमान् परिपालयन्तो ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ २९॥
श्रीमन्ननन्त शयनोडुपिवास शौरे ।
पूर्णप्रबोध हृदयांबर शीत रश्मे ।
लक्ष्मीनिवास पुरुषोत्तम पूर्णकाम ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ३०॥
श्री प्राणनाथ करुणा वरुणालयार्त ।
सन्त्राण शौन्द रमणीय गुणप्रपूर्ण ।
सङ्कर्षणानुज फणीन्द्र फणा वितान ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ३१॥
आनन्दतुन्दिल पुरन्दर पूर्वदास ।
वृन्दाभिवन्दित पदांबुजनन्द सूनो ।
गोविन्द मन्दरगिरीन्द्र धरांबुदाभ ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ३२॥
मीनाकृते कमठरूप वराहमूर्ते ।
स्वामिन् नृसिंह बलिसूदन जामदग्न्यः ।
श्री राघवेन्द्र यदुपुङ्गव बुद्ध कल्किन् ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ३३॥
गोपाल गोप ललनाकुलरासलीला ।
लोलाभ्रनील कमलेश कृपालवाल ।
कालीयमौलि विलसन्मणिरञ्जिताङ्घ्रे ।
मध्वेश कृष्ण भगवन् तव सुप्रभातम् ॥ ३४॥
कृष्णस्य मङ्गल निधेर्भुवि सुप्रभातं ।
येहर्मुखे प्रतिदिनं मनुजाः पठन्ति ।

विन्दन्ति ते सकल वाञ्छित सिद्धिमाशु ।
ज्ञानञ्च मुक्ति सुलभं परमं लभन्ते ॥ ३५ ॥
॥ श्री कृष्णार्पणमस्तु ॥

Edited by Ambarish Srivastava j_ambarish@yahoo.com

Please send corrections to sanskrit@cheerful.com
Last updated January 16, 2004